# गुरु गीतम्

१ अव्यक्ताद्यत एतद् व्यक्तं जातमशेषम् ।
यद् धत्ते तदजस्रं यत्रान्ते लयमेति ॥

२ आधारे खलु यस्मिन् गोलानां सह लक्षैः ।
ब्रह्माण्डं प्रतितिष्ठत्येतन्निस्तुलसत्वे ॥

३ सूर्यादिग्रहभासां यन्मूलं घनतेजः ।
यद् ब्रह्मादिसुराणां शक्त्यै शक्तिरुताहो ॥

४ ज्ञात्वा तत्त्वमसज्ञा भासा यस्य रमन्ते ।
यज्जालेन समस्ते द्वैतेक्षाऽल्पमतीनाम् ॥

५ यद्ध्यानेन भवन्ति स्वात्मानन्दनिमग्नाः ।
यन्निष्ठा खलु मुक्तिर्यच्छन्दोऽपि तदर्थः ॥

६ तद् ब्रह्म प्रणवाख्यं चित्ते ध्यानकृते मे ।
अश्रान्तं रमणाख्यां बिभ्रद् भातु मदिष्टाम् ॥

७ आधारे धृतमूलं हार्दाब्जे कृतवासम् ।
शीर्षाब्जाय वहद्यत्पष्चादिन्द्रियशक्त्यै ॥

८ दृष्ट्यां तत्र पराच्यां यद्देहभ्रमकारि ।
आवृत्तं तु पुनर्यत् स्वात्मैक्यानुभवाय ॥

९ पश्यद्वा विषयौघं विश्रान्तं यदुताहो ।
मुक्त्यै संस्थितमन्तर्वृत्त्यैक्यानुभवेन ॥

१० आत्मज्योतिरिदं मे बिभ्राणं रमणाख्याम् ।
अश्रान्तं स्फुरतात् तत् शुद्ध हार्दसरोजे ॥

११ यद्दीपाद्रमणाख्याद् व्याप्तं गाणपतीषु ।
वाणीभित्तिषु धत्ते गीताचित्रविलासम् ॥

१२ यद् हन्ति ज्छविजालैरज्ञानां तिमिराणि ।
तत्तत्त्वं स्फुरताद्वः तारधानसमाधौ ॥

१३ यातायातविहारैराधारेषु च शीर्षे ।

संचारं विदधानं किं चाशेषविसारि ॥

१४ आलम्बेन विहीनं व्योमामं परिपूर्णम् ।

निश्शब्दं गुरुरूपं तद् ब्रह्म स्फुरतान्मे ॥

१५ ज्ञानं भाति परोक्षं यत्तत्त्वश्रवणेन ।

यत्साङ्गत्यविशेषो हेतुः स्यादपरोक्षे ॥

१६ यच्चिन्ता स्थिरमुक्त्यै ब्रह्मैतद्रमणाख्यम् ।

मामावृत्य समन्तादानन्दे निदधातु ॥

१७ तारानन्दनियुक्तः प्रीत्या तस्य मतेन ।

आधाद्दीप्तगभीरं वासिष्ठो गुरुगीतम् ॥